**Mahābhārata III.277**
२७७

युधिष्ठिर उवाच
नात्मानमनुशोचामि नेमान्भ्रातष्टन्महामुने ।
हरणं चापि राज्यस्य यथेमां द्रूपदात्मजाम् ।।१।।
द्यूते दुरात्मभिः क्लिष्टाः कृष्णया तारिता वयम् ।
जयद्रथेन च पुनर्वनादपहृता बलात् ।।२।।
अस्ति सीमन्तिनी काचिद्दृष्टपूर्वाथ वा श्रुता ।
पतिव्रता महाभागा यथेयं द्रूपदात्मजा ।।३।।
मार्कण्डेय उवाच
शृणु राजन्कुलस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेतद्यथा प्राप्तं सावित्र्या राजकन्यया ।।४।।
आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश्च शरण्यश्च सत्यसन्धो जितेन्द्रियः ।।५।।
यज्वा दानपतिदक्षिः पौरजानपद प्रियः ।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ।।६।।
क्षमावाननपत्यश्च सत्यवाग्विजितेन्द्रियः ।
अतिक्रान्तेन वयसा सन्तापमुपजग्मिवान् ।।७।।
अपत्योत्पादनार्थं स तीव्रं नियममास्थितः ।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ।।८।।
हुत्वा शतसहस्रं स सावित्र्या राजसत्तम ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ।।९।।
एतेन नियमेनासीद्वर्षाण्यष्टादशैव तु ।
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ।
स्वरूपिणी तदा राजन्दर्शयामास तं नृपम् ।।१०।।
अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ।।११।।
ब्रह्मचर्येण शुद्धेन दमेन नियमेन च ।
सर्वात्मना च मद्भक्त्या तुष्टास्मि तव पार्थिव ।।१२।।
वरं वृणीष्वाश्वपते मद्रा राजयथेप्सितम् ।
न प्रमादश्च धर्मेषु कर्थव्यस्ते कथं चन ।।१३।।
अश्वपतिरुवाच
अपत्यार्थः समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभावनाः ।।१४।।
तुष्टासि यदि मे देवि काममेतं वृणोम्यहम् ।
सन्तानं हि परो धर्म इत्याहुर्मां द्विजातयः ।।१५।।
सावित्र्युवाच
पूर्वमेव मया राजन्नभिप्रायमिमं तव ।
ज्ञात्वा पुत्रार्थमुक्तो वै तव हेतोः पितामहः ।।१६।।
प्रसादाच्चैव तस्मात्ते स्वयम्भुविहिताद्भुवि ।
कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति ।।१७।।

उत्तरं च न ते किं चिद्व्याहर्थव्यं कथं चन ।
पितामह निसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥१८॥
मार्कण्डेय उवाच
स तथेति प्रतिज्ञाय सावित्र्या वचनं नृपः ।
प्रसादयामास पुनः क्षिप्रमेवं भवेदिति ॥१९॥
अन्तर्हितायां सावित्र्यां जगाम स्वगृहं नृपः ।
स्वराज्ये चावसत्प्रीतः प्रजा धर्मेण पालयन् ॥२०॥
कस्मिंश्चित्तु गते काले स राजा नियतव्रतः ।
ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे ॥२१॥
राजपुत्र्यां तु गर्भः स मालव्यां भरतर्षभ ।
व्यवर्धत यथा शुक्ले तारापतिरिवाम्बरे ॥२२॥
प्राप्ते काले तु सुषुवे कन्यां राजीवलोचनाम् ।
क्रियाश्च तस्या मुदितश्चक्रे स नृपतिस्तदा ॥२३॥
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि ।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥२४॥
सा विग्रहवतीव श्रीर्व्यवर्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥२५॥
तां सुमध्यां पृथुश्रोणीं प्रतिमां काञ्चनीम् इव ।
प्राप्तेयं देवकन्येति दृष्ट्वा संमेनिरे जनाः ॥२६॥
तां तु प१४पलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद्वरयामास तेजसा प्रतिवारितः ॥२७॥
अथोपोष्य शिरःस्नाता दैवतान्यभिगम्य सा ।
हुत्वाग्निं विधिवद्विप्रान्वाचयामास पर्वणि ॥२८॥
ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः ।
पितुः सकाशमगमद्देवी श्रीरिव रूपिणी ॥२९॥
साभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर्वरारोहा नृपतेः पार्श्वतः स्थिता ॥३०॥
यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर्नृपतिर्दुःखितोऽभवत् ॥३१॥
राजोवाच
पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥३२॥
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ॥३३॥
श्रुतं हि धर्मशास्त्रे मे पठ्यमानं द्विजातिभिः ।
तथा त्वमपि कल्याणि गदतो मे वचः शृणु ॥३४॥
अप्रदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः ।
मृते भर्थरि पुत्रश्च वाच्यो मातुररक्षिता ॥३५॥
इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥३६॥

मार्कण्डेय उवाच

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः ।
व्यादिदेशानुयात्रं च गम्यताम् इत्यचोदयत् ।। ३७ ।।

साभिवाद्य पितुः पादौ व्रीडितेव मनस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ।। ३८ ।।

सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ।। ३९ ।।

मान्यानां तत्र वृद्धानां कृत्वा पादाभिवन्दनम् ।
वनानि क्रमशस्तात सर्वाण्येवाभ्यगच्छत ।। ४० ।।

एवं सर्वेषु तीर्थेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ।। ४१ ।।